॥ श्रीसीतारामचन्द्राभ्यां नमः ॥
॥ श्रीमते रामानन्दाचार्याय नमः ॥
॥ श्रीमद्गोस्वामितुलसीदासाय नमः ॥

शेष कृत

॥ रामस्तुतिः ॥

This text has been prepared by
Vishal Pandey (B.Tech IIT Kanpur)
with the blessings of
Chitrakūṭa Tulasīpīṭhādhiśvara
Jagadguru Rāmānandāchārya
Śrī Svāmī Rāmabhadrāchārya

शेष उवाच

नमामि ते नाथ पदाम्बुजद्वयं सुवर्णरत्नामलपावुकाश्रितम् ।
विरञ्चिशक्रादिशिवान्तकादिभिर्मणिप्ररोहैः कृतनीराजनं यत् ॥ १ ॥

नमामि ते नाथ तनुत्रभङ्गिनीं सीताद्दगानन्दसमूहसागरम् ।
प्रावृड्डयोवाहसुनीलदीधितिं भिन्नाञ्जनस्तोमतमालमेचकम् ॥ २ ॥

नमामि च त्वां सहजानन्दरूपं परात्परं ब्रह्मणोऽपि प्रतिष्ठाम् ।
सदामृतस्याश्रयमेकसत्यं प्रतिष्ठितः शाश्वतो यत्र धर्मः ॥ ३ ॥

येयं त्रयी नाथ वितत्य संस्थिता शब्दब्रह्मात्मिका सा तवैव ।
समासतो व्यासतो वा गुणौघान् गायत्युच्चैर्मागधानां सभेव ॥ ४ ॥

कर्मापि ते नाथ तथैव शक्तिः क्रियात्मिका शाश्वति सुप्रतिष्ठा ।
इष्टापूर्ताद्यात्मिका सत्फलाढ्या जगत्प्रतिष्ठाजनने समर्था ॥ ५ ॥

कालोऽपि ते नाथ द्दशोर्निमेषो दिवानिशं वर्षफलोपचायो ।
कल्पावधिर्ब्रह्मशक्राधिशक्तःसृष्टिस्थितिप्रलयान्तक्रियो यः ॥ ६ ॥

त्वं पक्षिरूपेण पुरेषु भूयो विराजसे द्वित्रिचतुष्पदेषु ।
प्रविष्टवद्भास्यप्रविष्टोऽपि भूमन् साक्षी नित्यश्चिद्घनस्तत्त्वतत्त्वम् ॥ ७ ॥

त्वया पुरा कापि परैव सा गिरा प्रबोधमानानिलवह्नियोगतः ।
असूत शब्दं त्रिवृदात्मकं यदा तदाभवत् स्थावरजङ्गमं जगत् ॥ ८ ॥

संजातमात्रस्य विधेर्जडस्य विवेकहीनस्य विधेयवस्तुनि ।
त्वमादिदेवो हृदयेऽवातरत्ततो विनिर्ममेऽसौ विविधव्यक्तिराशीन् ॥ ८ ॥

एकोऽपि स त्वं बहुरूपेण द्दश्यः सन्नेव रामः त्रिजगद्विग्रहोऽसि ।
अतोऽन्यविज्ञानविनिर्मलात्मभिर्ब्रह्मैव सर्वं भाति भूतं च भव्यम् ॥ ९ ॥

एकोऽहमेवं बहुधा भवेयमितीक्षणं ते नाथ सदैव यस्मिन् ।
सर्गस्यादौ निर्गताः स्वांशरूपा जीवाकाराश्चिद्गुणाः सस्वभावाः ॥ १० ॥

केचित्तेषां नित्यमुक्ता बभूवुः केचिद्भूयः साधनैर्मुक्तिभाजः ।
केचित्संसाराब्धिमध्ये दुरन्ते भूयो भूयो जन्मदुःखादिभाजः ॥ ११ ॥

अचित्प्रपञ्चोऽपि तवैव रूपं वैकुण्ठकुड्याङ्गणकुट्टिमादि ।
सदेव दृग्गोचरतां व्रजत्यपि स्वयं चिदानन्दमयं दिगन्तरम् ॥ १२ ॥

नित्यैव ते नाथ विनोदलीला शृङ्गारवीरामृतसिन्धुपूरा ।
यस्यां निमज्जन्ति सदावदातास्ते राजहंसाः शुकनारदाद्याः ॥ १३ ॥

जानामि ते नाथ परस्य सर्वेऽप्यंशा अमी स्थूलसूक्ष्मादिरूपाः ।
स्थूलाः स्फुटं ये विविधावताराः सूक्ष्माः परं संसृतजीवसंज्ञाः ॥ १४ ॥

अहो अगाधा भवतोऽस्य माया विमुक्तमायस्य चिदेकसंश्रयाः ।
यथैकरूपोऽपि भवान्नवैव दृश्योऽसि भेदात्मधियां न वै सताम् ॥१५ ॥

देशं सु कोशल पदं च परं त्वदीयं धामास्ति सच्चित्सुखमद्वितीयम् ।
विराजते यत्र सुकोमलाख्या पुरी समुद्यत्सरयूतरङ्गा ॥ १६ ॥

यत्रास्ति रत्नौघसुवर्णनिर्मितः प्राकारवर्यो धृततुङ्गयन्त्रः ।
अनेकदुर्धर्षणगोपुरान्तः कपाटसंघट्टित वज्रकीलकः ॥१७ ॥

नित्यं प्रमोदवनमद्भुतकेलिकुञ्जं मध्वादिसर्वमृतुसौख्यसमूहजुष्टम् ।
तत्राप्यशोकलतिकावनमस्ति यत्र प्राणेश्वरी विजयते तव जानकी सा ॥ १८ ॥

सोऽयं तवैव महिमा निगमप्रसिद्धो यत्सार्वभौमपदवीप्रमुदां पुराणाम् ।
यत्रोत्तरोत्तरमभाणि शताधिकत्वं तस्यापि राम नितरामवधिस्त्वमेव ॥ १९ ॥

येऽन्ये तवावतरणा इह मत्स्यकूर्मवाराहसिंहवरवामनभार्गवाद्याः ।
तेषामपि त्वमुदयो निलयश्च राम सीतापते सहजचित्सुखकेलिसिन्धुः ॥ २० ॥

विद्यास्वरूपमवलम्ब्य सतां जनानां हृत्पुण्डरीकविषयेषु भवांश्चकास्ति ।
नोचेत्सुदुस्तरतरत्वदपारमायाबन्धात्मकाद् भवरयात् कथमुद्धृतिः स्यात् ॥ २१ ॥

रामेतिनाम भवतस्त्रिवृतोऽपि वर्ष पापात्मनोऽपि सकृदुच्चरितं पुनीते ।
ज्ञात्वेत्थमेव मुनिभिः सततं प्रशान्तैश्चित्ते सदा परमहंसतमैर्निखातम् ॥ २२ ॥

त्वत्सङ्गिनीं नाथ नमामि तां परां शक्तिं सुपूर्णां सहजामद्वितीयाम् ।
या नित्यवृन्दावनकेलिकारिणी प्रमोदवल्लीवनदेवता च ॥ २३ ॥

लीलाविशिष्ट भवतोऽपि च राम नाम रूपं च ते तादृशं मे चकास्तु ।
माणिक्यरत्नस्फुरितावतंसकं सुदीप्तगुञ्जामणिहारशोभितम् ॥ २४ ॥

माङ्गल्यकोत्सङ्गविशेषलालितं गोपाङ्गनादृष्टिकटाक्षदीक्षितम् ।
रामाभिधानं परमं महस्तत् सदैव नेत्रातिथितां प्रयातु मे ॥ २५ ॥

रघुकुलकमनीयं कामुकं गोपिकानां व्रजपुररमणीयं नीलवैदूर्यरम्यम् ।
जनकनृपतनूजाप्रीतिसंदोहपात्रं सुचिरमहमुपासे राघवं रामचन्द्रम् ॥ २६ ॥

अशोकवनकुञ्जभूसहजनित्यकेलिप्रियं व्रजस्थहरिणीदृशां मदनरागसंवर्द्धनम् ।
ककुत्स्थकुलभूषणं निगमकोटिवक्तृस्तुतं भजे दशरथात्मजं परं रामचन्द्रं मुदा ॥ २७ ॥

इतिस्तुतिपरे शेषे प्रसन्नो राघवेश्वरः ।
प्रोवाच स्मयमानेन मुखेन मधुराकृतिः ॥ २८ ॥

अहो नागेन्द्र शेष त्वं सम्यक् व्यवसितोऽसि भोः ।
यन्मदीया परा भक्तिः स्फुरिता हृदये तव ॥ २९ ॥

न तां प्राप्नोति वै धाता न शिवो नापि वासवः ।
नित्यलीलारतिः सा ते वार्धिष्णुर्दृश्यते हृदि ॥ ३० ॥

अथापि यदि यत्काम्यं तन्मत्तो व्रियतां मुहुः ।
संप्रीतस्तेऽनया भक्त्या ददाम्यहमतिप्रियम् ॥ ३१ ॥

भक्तोऽसि वैष्णवाग्र्योऽसि प्राज्ञोऽसि भुजगेश्वर ।
यत्ते हृदि प्रियं वस्तु मत्तस्तत् प्रार्थ्यतां मुहुः ॥ ३२ ॥

नह्यलभ्यं मदीयानां भक्तानां मयि दातरि ।
ऐहिकामुष्मिकं वापि यत्स्वरूपं च दुर्लभम् ॥ ३३ ॥

इतिश्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे शेषस्तुतिर्नाम
अष्टाशीतितमोऽध्यायः ॥ ८८ ॥